
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

Checked 2012

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M 990 विषय मंत्रशास्त्र

नाव. मंत्रमाला (mss)

लेखक/लिपीकार —

पृष्ठ 31 काळ शके 1875 पूर्ण/अपूर्ण

॥ अथ मंत्रमालाप्रारभ्यते ॥



॥ अथ मंत्रमालानुक्रमणिका ॥

॥ समाप्तेयं मंत्रमाला मंत्रानुक्रमणिका ॥

॥ समाप्तेयं मंत्रमाला मंत्रानुक्रमणिका ॥

॥श्रीगणेशायनमः॥ श्रीसरस्वत्यै नमः॥ श्रीगुरुभ्यो नमः॥

ॐ अस्य श्री शिवपंचाक्षरी मंत्रस्य। वामदेव ऋषिः। पंक्तिश्छंदः
। श्रीसदाशिव रुद्रो देवता। ॐ बीजम्। नमः शक्तिः। शिवा-
येति कीलकम्। मोक्षार्थे जपे विनियोगः। ॐ सर्वज्ञशक्ति धाम्ने
अंगुष्ठाभ्यांनमः। नं नित्य तृप्तिधाम्ने तर्जनीभ्यांनमः। मं अनादि
बोधशक्तिधाम्ने मध्यमाभ्यांनमः। शिं स्वतंत्र शक्तिधाम्ने अना-
मिकाभ्यांनमः। वां अलुप्त शक्तिधाम्ने कनिष्ठिकाभ्यांनमः। यं
अनंत शक्तिधाम्ने करतलकरपृष्ठाभ्यांनमः। एवंहृदयादि न्यासाः

१ अथ ध्यानम्। शांतं पद्मासनस्थं शशिधरमुकुटं पंचवक्त्रं त्रिनेत्रं।
शूलं वज्रंच खड्गं परशुमभयदं वामभागे वहंतम्॥ नागं पाशंच घंटां
प्रलय हुतवहं चांकुशं वामभागे। नानालंकारयुक्तं स्फटिकमणिनि
भं पार्वतीशं नमामि॥१॥ पंचपूजा। मंत्रः। ॐ नमः शिवाय। जपा
न्ते पुनः नमस्कार ध्यान पंचपूजा संकल्प उपसंहारमुद्रा अंगन्यास
करन्यासाः॥१॥ ॐ अस्य श्री पंचाक्षरि मंत्रस्य। वामदेव ऋषिः। पंक्तिश्छं
दः। श्री सांब सदाशिवो देवता। ॐ बीजम्। नमः शक्तिः। नं कीलकं। १

श्रीसांबसदाशिव प्रसाद सिद्ध्यर्थे जपे वि०। ॐ अंगु०। नं तर्ज०।
मं मध्य०। शिं अना०॥ वां कनि०। यं कर०। एवं हृदयादि०॥
ध्यानम्। शांतं पद्मासनस्थं०। पंचपूजा मंत्रः सर्वं पूर्ववत्॥२॥
अस्य श्री प्रासाद पंचाक्षरी महामंत्रस्य। वामदेव ऋषिः। पंक्ति
श्छंदः। श्रीसांब सदाशिवो देवता। ह्रां बीजं। ह्रीं शक्तिः। शिवायेति की-
लकम्। श्रीसांबसदाशिव प्रीत्यर्थे जपे विनियोगः। ह्रां अं०। ह्रीं त०। ह्रूं
म०। ह्रैं अ०। ह्रौं क०। ह्रः कर०। एवं हृदयादि०। ध्यानं। मूले कल्पद्रुमस्य
द्रुतकनकनिभं चारुपद्मासनस्थं। वामांगासक्तगौरी निबिडकुचभरा-

२ भोगगूढोपभोगम् ॥ नानालंकारयुक्तं वरपरशुमृगाभीतिहस्तं त्रिनेत्रं।
वंदे बालेन्दुमौलिं गजवदन गुहाभ्यामुपश्लिष्टपार्श्वम् ॥१॥ पंचपूजा॥
मंत्रः॥ ह्रीं नमः शिवाय॥ पुन्हः पूर्ववत् ॥३॥
अस्य श्रीरामषडाक्षरी महामंत्रस्य। ब्रम्हा ऋषिः। गायत्री छंदः। श्रीराम
चंद्रो देवता। रां बीजम्। नमः शक्तिः। रामायेति कीलकम्। श्रीरामचंद्र
प्रीत्यर्थे जपेविनियोगः। रां अं०। रीं तं०। रुं मं०। रैं अं०। रौं कं०। रः कः
एवंहृदयादि०। ध्यानं। कालांभोधरकांतिकांतमनिशं वीरासनेसंस्थितं। २.
मुद्रां ज्ञानमयीं दधानमपरं हस्तांबुजं जानुनि॥ सीतापार्श्वगतां सरोरुह

करां विद्युन्निभां राघवम्। पश्यंती मुकुटांगदादि विविधा कल्पोज्वलांगं भजे॥१॥ पंचपूजा। मंत्रः। रां रामायनमः। पुन्हः पूर्ववत्॥४॥
अस्य श्री पांडुरंग मंत्रस्य। ब्रम्हा ऋषिः। गायत्री छंदः। श्री पांडुरंग परमात्मा देवता। ॐ बीजं। स्वाहा शक्तिः। श्रीं कीलकम्। श्रीपांडुरंगपरमेश्वर प्रीत्यर्थे जपे विनियोगः॥ ॐ नमो अं०। भगवते त०। श्री म०। विठ्ठलाय अनामिका०। गोपीजन क०। वल्लभाय कर०॥ एवं हृदयादि०॥ ध्यानं। समचरण सरोजं सांद्रनीलांबुदाभं जघन निहित पाणिं मंडनं मंडनानाम्॥ तरुणतुलसीमाला कंधरं कंजनेत्रं सदयधवल हासं विठ्ठलं चिंतयामि॥१॥ पंचपूजा। मंत्रः। ॐ नमो भगवते श्री विठ्ठलाय गोपीजनवल्लभाय[स्वाहा] शेषं पूर्ववत्॥ ५॥

अस्यश्री लक्ष्मी मंत्रस्य । वामदेव ऋषिः । बृहती छंदः । श्रीदेवता ।। श्रां
३ बीजं । श्रीं शक्तिः । महालक्ष्मी प्रीत्यर्थे जपे विनियोगः। श्रां अं । श्रीं तः।
श्रूं मः । श्रैं अः । श्रौं कः । श्रः करः । एवं हृदयादि० । ध्यानं । यासापद्मा
सनस्था विपुलकटि तटि पद्मपत्रायताक्षी । गंभीरावर्त नाभी स्तनभर
नम्रिता शुभ्रवस्त्रोत्तरीया ।। लक्ष्मी र्दिव्यैर्गजेन्द्रै र्मणिगण खचितैः स्ना
पिताहेम पद्महस्तामम वस्तु गृहे सर्व मांगल्ययुक्ता ।।१।।
पंचपूजा । मंत्रः - 'श्रीं
अस्यश्री मेधादक्षिणा मूर्ति महामंत्रस्य । ब्रम्ह ऋषिः । दैवीगायत्री छंदः । ३

श्रीदक्षिणामूर्तिर्देवता। ॐ बीजं। स्वाहा शक्तिः। नमः कीलकं। श्रीदक्षिणा
मूर्तिप्रसादसिद्ध्यर्थं जपविनियोगः। ॐ नमो भगवते अं०। दक्षिणामूर्तये त०।
मह्यं म०। मेधांप्रज्ञां अ०। प्रयच्छ क०। स्वाहा कर०। एवं हृदयादि०॥ ॐ भूर्भु
वः स्वरोमिति दिग्बंधः। ध्यानं। कलशममृतपूर्णं मौक्तिकीमक्षमालां विविध
विमलविद्यां ज्ञानमुद्रांकराग्रैः॥ दधतमुरगहस्तं सर्वधीमाक्षभूतं विधृतवि
विधभूषं दक्षिणामूर्तिमीडे॥१॥ पंचपूजा॥ मंत्रः ॐ नमो भगवते दक्षि
णामूर्तये मह्यं मेधां प्रज्ञां प्रयच्छ स्वाहा॥ शेषं पूर्ववत्॥७॥
अस्य श्री शास्ता मंत्रस्य। अर्धनारीश्वर ऋषिः। अनुष्टुप् छंदः। श्रीमहा

शास्ता देवता। ह्रीं बीजं। श्रीं शक्तिः। क्लीं कीलकं। इष्टकामनासिध्यर्थे जपे

४ विनि०। ह्रीं श्रीं क्लीं अं। हरिहरपुत्राय तं। पुत्रलाभाय मं। शत्रुनाशाय

अं। मलगजवाहनाय कनि०। महाशास्त्रायकर। एवं हृदयादि०। ध्यानम्।

आश्याम कोमल विशाल तनुं विचित्रं। वासोवसान मरुणोत्पलदाम हस्तं॥

उत्तुंग रत्न मुकुटं कुटिलाग्र केशाम्। शास्तारमिष्टवरदं शरणं प्रपद्ये॥१॥

पंचपूजा। मंत्रः।

९.

अस्य श्री मोहिनी मंत्रस्य। ईशान ऋषिः। जगती छंदः। मोहिनी देवता।

ह्रीं

रैंबीजं। ह्रींशक्तिः। क्लीं कीलकं। मोहने जपे वि०। ऐं-ह्रां अं०। ऐं-ह्रीं त०।
ऐं-ह्रूं मध्य०। ऐं-ह्रैं अना०। ऐं-ह्रौं क०। ऐं-ह्रः कर। एवं हृदयादि। ऐं-ह्रः-हूं फट्
इतिदिग्बंधः। ध्यानं। भुवनविजयरक्षापुष्पबाणेषु चापा। जगतिविविध
रूपं दर्शयंतीजनानाम्॥ तरुणतरणिशोभा स्वेतवासोवसानाम्। जयति
सकललोकान्जीवनी मोहनिष्याम्॥१॥ पंचपूजा। मंत्रः
पंचसहस्त्रजपः। पुन्हा पूर्ववत्॥ पंचकोणं
लिखेच्छक्तिं। मध्यबीजनवेष्टयेत॥ पंचकोणे लिखेत् बाह्ये साध्य
समन्वितं॥देव मुखेयंत्र दर्शयन्त्रजपेन्मनुः। जंगमाजंगमानांच देव-

भूतादिराक्षसान् । पुरतो विविधं रूपं दर्शनं विस्मयं भवेत् ॥ ८ ॥

अस्य श्री वासुदेव द्वादशाक्षरी महामंत्रस्य । प्रजापति ऋषिः । जगती छंदः । श्रीवासुदेवो देवता । ॐ बीजं । नमः शक्तिः । श्रीवासुदेव प्रीत्यर्थे जपेवि० । ॐ नमः अं० । भगवते तं० । वासुदेवाय ख[illegible] । ॐ नमः अना० । भगवते क० । वासुदेवाय कर० । एवं हृदयादि० । हरिमुज्वल चक्रधराजगदा कुमुदीः परिधं श्रित पद्मगतम् । वलयांगद हार किरीटधरं नवकुंदरुचं प्रणमामि सदा ॥ १ ॥ पंचपूजा । मंत्रः । ॐ नमो भगवते वासुदेवाय । जपांते पुनः पूर्ववत्

अस्य श्री अष्टादशाक्षरी मदनगोपाल महामंत्रस्य। नारदऋषिः। गायत्री छंदः
श्री मदनगोपालकृष्णः परमात्मा देवता। क्लीं बीजं। स्वाहा शक्तिः। ममश्री
गोपालकृष्णप्रसादसिध्द्यर्थे जपे वि०। क्लीं अं०। कृष्णाय त०। गोविंदाय म०।
गोपीजन अ०। वल्लभाय क०। स्वाहा कर०। एवं हृदयादि०। भूर्भुवःस्वरोम् इति
दिग्बंधः। ध्यानम्। फुल्लेन्दीवरकांतमिंदुवदनं वर्हावतंसप्रियं। श्रीवत्सांक
मुदारकौस्तुभधरं॥ पीतांबरं सुंदरं गोपीनां नयनोत्पलार्चित तनुं गोगोपसं-
घावृतं। गोविंदं कलवेणुवादनपरं दिव्यांगभूषं भजे॥१॥ पंचपूजा। मंत्रः
क्लीं कृष्णाय गोविंदाय गोपीजनवल्लभाय स्वाहा। जपांते पुनः पूर्ववत्॥११॥

६ अस्य श्री नारायणाष्टाक्षरी महामंत्रस्य । साध्यनारायण ऋषिः । देवी गायत्री
छंदः । श्रीनारायणो देवता । ॐ बीजं । आय शक्तिः । श्रीनारायण प्रीत्यर्थे जपे वि॰
क्रुध्दोल्काय स्वाहा अं॰ । महोल्काय स्वाहा त॰ । वीरोल्काय स्वाहा म॰ । द्युल्काय
स्वाहा अ॰ । सहस्रोल्काय स्वाहा क॰ । सर्वोल्काय स्वाहा कर॰ । एवं हृदयादि॰ ।
ध्यानं । अर्काभास्वत्किरीटान्वितमकरळसत्कुंडलं दीप्तिराजन् । केयूरं कौस्तु
भाढ्यं सुबहुरुचिकरं सांद्रपीतांबरंच ॥ नानारत्नांशुभिन्नाभरणकुचयुजंश्री
धराश्लिष्टपार्श्वं । वंदे दोर्भिःसचक्रांबुज वरणदं विश्ववद्यं मुकुंदम् ॥१॥
पंचपूजा । मंत्रः । ॐ नमोनारायणाय । पुन्हः पूर्ववत् ॥ १२ ॥ ६०

अस्य श्री संतानगोपाळमंत्रस्य। नारद ऋषिः। अनुष्टुप् छंदः। संतानगो
पालो देवता। ॐ बीजं। देहीति शक्तिः। संतानगोपाळ सिध्यर्थे जपे वि०।
ऋष्यादि स्मृत्वा यथास्थानं विन्यस्य। न्यासः। ॐ देवकी सुत गोविं
द अं०। वासुदेव त०। जगत्पते म०। देहिमे तनयं कृष्ण अ०। त्वामहं श-
रणं गतः क०। ॐ देवकी सुत गोविंद वासुदेव जगत्पते। देहिमे तनयं कृ
ष्ण त्वामहं शरणं गतः॥ कर०। एवं हृदयादि०॥ ध्यानं। शंखचक्र-
धरं देवं श्यामवर्णं चतुर्भुजम्॥ सर्वाभरणसंदीप्तं पीतवासं समन्वितं
॥ मयूरपिच्छसंयुक्तं विष्णुतेजोपबृंहितम्। समर्पयंतं विप्राय नष्टानानी
यबालकान्॥ करुणामृतसंपूर्णदृष्टेक्षंतं च तं द्विजं॥ पंचपूजा। मंत्रः।

ॐ देवकीसुत गोविंद वासुदेव जगत्पते । देहि मे तनयं कृष्ण त्वामहं शरणं

८ गतः ॥ जपार्चनादीनि कुर्याद्यथा शक्तितः । जपांते पुनः पूर्ववत् । ध्यानं ।

विजयेन युतो रथस्थितः प्रसमानीय समुद्रमध्यतः । प्रददत्तनयान्द्विजन्मने

स्मरणीयो वसुदेवनंदनः ॥१॥ १३॥

अस्य श्री भुवनेश्वरी मंत्रस्य । विरूपाक्ष ऋषिः । महागायत्री छंदः । श्री

भुवनेश्वरी देवता । अक्षरं बीजं । ह्रीं शक्तिः । शतस्या षडंगन्यासः । ध्यानं

रत्नसिंहासनासीनां रत्नश्रीपादपीठिकाम् । अर्धेन्दुशेखरां स्निग्धकुंडलां ८

मणिकुंडलाम् ॥१॥ हेमपद्मकोदरी चामराभ्यां वीज्यमानां सर्वराजपरि

च्छदां मुक्तादामलसत्पादां द्विभुजां वा चतुर्भुजां रक्तपाशांकुशधरां सततं

वरदायिनीं जपहोमार्चनादिषु ध्याये देवीं सदांबुजे । स्फाहृत्सध्मजे ध्यात्वा साभवेत्सर्वकामदा ॥ पंचपूजा । मंत्रः - ह्रीं शेषं पूर्ववत् ॥१८॥

अस्य श्रीकृष्ण षडाक्षरी मंत्रस्य । ब्रम्हा ऋषिः । गायत्री छंदः । श्रीकृष्णः परमात्मा देवता । क्लीं बीजं । नमः शक्तिः । कृष्णायेति कीलकं । श्रीकृष्णप्रसादसिध्द्यर्थे जपे विनियोगः । क्लां अं । क्लीं त । क्लूं म । क्लैं अ । क्लौं क । क्लः कर । एवं हृदयादि । भूर्भुवःस्वरोम् इति दिग्बंधः । ध्यानं । कुंदप्रसूनविषदै दशनैश्चतुर्भिः संदंसमातरनिशं कुचकुंकुमांग्र । नंदस्य पुत्रमवलोकयतो मुरारेः कृष्णं नतोस्मि सततं शिवमातनोतु ॥१॥ पंचपूजा । मंत्रः । क्लीं कृष्णायनमः । शेषं पूर्ववत् ॥१९॥

अस्य श्री व्यंकटेश मंत्रस्य । ब्रह्मा ऋषिः । अनुष्टुप् छंदः । व्यंकटेशो देवता
८ ॐ वं बीजं । श्रीं शक्तिः । ह्रीं कीलकं । श्री व्यंकटेश प्रीत्यर्थे जपे वि० । ब्रह्मा ऋषये
नमः शिरसि । अनुष्टुप् छंदसे नमः मुखे । वं बीजाय नमः नाभौ । श्रीं शक्तये नमः
पादयोः । ह्रीं कीलकाय नमः सर्वांगे । श्री व्यंकटेश प्रीत्यर्थे जपे वि० । ॐ अं ।
नमो तं० । व्यंकटेशाय मं० । ॐ अं० । नमो कं० । व्यंकटेशाय कर । एवं हृदयादी०
। ॐ नमो सुदर्शन चक्राय इति दिग्बंधः । ध्यानं । ध्याये द्व्यंकटशैलनाथ मनिशं
श्रीभूषमेतं परं । श्यामं रत्नकिरीटकुंडलधरं केयूरहारान्वितम् । चक्राब्जौ
वरदं करैर्विदधत्कारुण्यपाथोनिधिम् । आयुर्वेदकरं पयोजनिलयं पद्माय ८
ताक्षं भजे ॥ शंखचक्रगदापद्मधेनुमुद्राः प्रदर्शयेत् । पंचपूजा । मंत्रः ।

ॐ नमो व्यं (वें) कटेशाय । द्वितीयमंत्रः । ॐ श्री नमो व्यंकटेशाय ह्रीं।
अस्य अंगन्यासादि पुर्वमंत्रवत् । करन्यासः। ॐ अं। श्रीः तः। नमो मः।
व्यंकटेशाय अः। ह्रीं कः। ॐ श्रीनमोव्यंकटेशाय ह्रीं करः। एवं हृदयादि।
सर्वं पुर्ववत् ॥ १६ ॥

अस्य श्रीकृष्ण अष्टाक्षरी मंत्रस्य । पराशर नारद भगवान्ऋषिः । विराट्छं
दः। श्रीकृष्णः परमात्मा देवता। क्लींबीजं । ओंयाति शक्तिः । श्रीकृष्णप्रसा
द सिध्यर्थे जपे विं। क्लां अं। क्लीं तः। क्लूं मः। क्लैं अः। क्लौं कः। क्लः करः
एवं हृदयादि। ध्यानं। फुल्लेन्दीवरकांतमिंदुवदनं बर्हावतंसप्रियम्। श्रीवत्सां
कमुदार कौस्तुभधरं पीतांबरं सुंदरम ॥ गोपीनांनयनोत्पलार्चिततनुं गोगोप

संघावृतं। गोविंदं कलवेणुवादनपरं दिव्यांगभूषं भजे ॥१॥ पंचपूजा।
मंत्रः। क्लीं कृष्णाय गोविंदाय। शेषं पूर्ववत् ॥१७॥

अस्य श्री षोडशाक्षरी राजराजेश्वरी महामंत्रस्य। दक्षिणामूर्ति ऋषिः शिरसि।
पंक्तिः छंदः मुखे। श्री राजराजेश्वरी ललिमहात्रिपुरसुंदरीदेवता हृदये। कएइलह्रीं
बीजं नाभौ। हसकहलह्रीं शक्तिः। सकलह्रीं सर्वांगयोः। मम भोगमोक्षार्थे
जपे वि०। ॐ ह्रां सर्वज्ञ ~~सर्व~~ शक्तिधाम्ने अं०। ॐ ह्रीं नित्यतृप्तिधाम्ने त०। ॐ
ह्रूं अनादिबोधशक्तिधाम्ने म०। ॐ ह्रैं स्वतंत्रशक्तिधाम्ने अ०। ॐ ह्रौं अलुप्त
शक्तिधाम्ने क०। ॐ ह्रः अनंतशक्तिधाम्ने कर०। एवं हृदयादि। ध्यानं।

सकुंकुमविलेपनां मलिकचुंबकस्तूरिकां। समंदहसितेक्षणां सशरचापपा
शांकुशाम्॥ अशेषजनमोहिनीं मरुणमाल्यभूषांबराम्। जपाकुसुमभासु
रां जपविधौ स्मरेदंबिकाम्॥ १॥ इति ध्यात्वा कुंकुमादि षोडशोपचारां पूजां
कृत्वा। मंत्रः। ह्रीं कएईल ह्रीं हसकहल ह्रीं सकल ह्रीं। इतिजप्त्वा।
पुनः पूर्ववत्। संक्षोभिणीं द्राविणीं काषाव श्यान्मादमाहांकुशे खेचरी वीज
योन्याख्या नवमुद्राः प्रकीर्तिताः। गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं
जपं। सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरी॥ अयं मंत्र महार्णवे त्रिपुर
सुंदरी नाम्ना लिखितः।

अस्य श्री भुवनेश्वरी मंत्रस्य । ईश्वर ऋषिः । अनुष्टुप् छंदः । श्री भुवनेश्वरी

१० देवता । ह्रां बीजं । ह्रीं शक्तिः । ह्रूं कीलकम् । ममेष्टसिध्यर्थे जपे वि० । ह्रां

अंगु० । ह्रीं तर्ज० । ह्रूं मध्य० । ह्रैं अ० । ह्रौं क० । ह्रः कर० । एवं हृदयादि ।

ध्यानम् ॥ यामाणिक्यमनोब्जकांतिरमलां सिंदूरभा संन्निभाम् । तारानायक

सोदरां त्रिनयनां पीनस्तनां भाषिताम् ॥ बंधूकप्रसवारुणांबरधरां मार्तंडको

ट्युज्वलाम् । सा साक्षात्भुवनेश्वरीं भगवतीं श्रेयांसि भूयासि नः ॥१॥ पंच १०

पूजा । मंत्रः

ॐ अस्य श्री सूर्य नारायण मंत्रस्य । भगवान् ऋषिः । विराट् छंदः । श्रीसूर्य नारायणो देवता । घृणिरिति बीजं । भास्करायनमः इति शक्तिः । अंशुमानिति कीलकं । मम इष्ट सिध्यर्थे जपे वि० । ह्रां अंगु० । ह्रीं त० । ह्रूं म० । ह्रैं अ० । ह्रौं क० । ह्रः कर० । एवं हृदयादि । ध्यानम् । हरितहयरथं दिवाकरं कनकमयांबुज रेणुपिंजरम् । प्रतिदिन मुदये नवं नवं शरण्य मुपैमि हिरण्यरेतसम् ॥ १ ॥ पंचपूजा । मंत्रः । शेषंपूर्ववत् ॥ श्रीवत्समुद्रा ॥

अस्य श्री हनुमान मंत्रस्य । श्रीरामचंद्र ऋषिः । अनुष्टुप छंदः । श्री हनुमान् देवता । मारुतात्मज इति बीजम् । अंजनी सूनुरिति शक्तिः । रामलक्ष्मण प्राणदात

तिकीलकं । मम सकलमनोरथसिध्द्यर्थे जपे वि० । ॐ अंजनीसुताय अं० ।
ॐ रुद्रमूर्तये नं० । ॐ वायुसुताय मं० । ॐ यज्ञगर्भाय अं० । ॐ रामदूताय कं० ।
११ ब्रह्मास्त्रनिवारणाय कर० । एवं हृदयादि । मंत्रे दिग्बंधः । ध्यानं । ध्या-
ये द्बालदिवाकरं द्युतिनिभं देवादि दर्पापहम् । देवेंद्रप्रमुखप्रशस्तयशसं
देदीप्यमानं रुचा ॥ सुग्रीवादि समस्तवानर युतं सुव्यक्ततत्वप्रियम् । संरक्ता
रुणलोचनं पवनजं पीतांबरालंकृतम् ॥१॥ पंचपूजा । मंत्रः । ॐ नमो भग
वते आंजनेयाय महाबलाय स्वाहा । शेषं पूर्ववत् ॥ २२॥ ११
अथ श्री बालात्रिपुरसुंदरी मंत्रः । ॐ अस्य श्री बालात्रिपुरसुंदरी महामंत्रस्य ।
दक्षिणामूर्तिऋषिः शिरसि । पंक्तिश्छंदः मुखे । श्रीबालात्रिपुरसुंदरी देवता हृ-

दये। ऐं बीजं गुह्ये। सौं शक्तिः पादयोः। क्लीं कीलकं नाभौ। श्रीबालात्रिपुरसुंदरी
प्रीतये सर्वांगे। मम चतुर्विध पुरुषार्थ सिध्दये जपे विनियोगः। ऐं अंगु०। क्लीं तर्ज०
सौं मध्य०। सौं अना०। क्लीं कनि०। ऐं करतल०। एवं हृदयादि०। भूर्भुवःस्वरोमिति दि-
ग्बंधः। अथ ध्यानम्। अरुणकिरणजालै रंजिता सावकाशा। विधृतजपवटिका पुस्त
के शोभि हस्ता॥ इतरकरवरस्था फुल्लकल्हारमाला। निवसतु हृदि बाला नित्य कल्या-
णरूपा॥१॥ मंत्रो यथा-[हस्तलिखित मल्लिकायाः- ॐ ऐं क्लीं सौं ॐ ऐं क्लीं सौं बालात्रिपुरसुंदर्यै नमः।]
पंचपूजा। जपः। गुह्याति०। शेषं पूर्ववत्॥२३॥
अथ श्री आपदुध्दारण बटुभैरव मंत्रः। ॐ अस्य श्री आपदुध्दारण बटुभैरव मंत्रस्य
बृहदारण्यको ऋषिः। आपदुध्दारण बटुभैरवो देवता। अनुष्टुप् छंदः। ॐ बीजं।

-ह्रीं शक्तिः। श्रीं कीलकम्। आपदुद्धारण बटुभैरवप्रीत्यर्थे ममसकल कामनासि
द्ध्यर्थे जपवि०। -ह्रां वां अंगु०। ह्रीं वीं तर्ज०। ह्रूं वूं मध्य०। ह्रैं वैं अना०। ह्रौं वौं
कनि०। ह्रः वः करतल०। एवं हृदयादि०। मूलेन दिग्बंधः। अथ ध्यानम्। करकलि-
तकपालः कुण्डली दण्डपाणिस्तरुणतिमिरनीलव्यालयज्ञोपवीती।। क्रतुसमयसप-
र्या विघ्नविच्छेदहेतुर्जयति बटुकनाथः सिद्धिदः साधकानाम्।।१।। पंचपूजा।
जपः। मंत्रो यथा-[मंत्रमहार्णवे- "ॐ ह्रीं बटुकाय आपदुद्धारणाय कुरु कुरु
बटुकाय ह्रीम्।"] शेषं पूर्ववत् ।।२८।।

~~अथ श्रीरामचंद्रमंत्रप्रयोगः। ॐ अस्य श्रीरामचंद्रमंत्रस्य। बुधकौशिक ऋषिः।~~
~~अनुष्टुप् छंदः। सीतालक्ष्मणसहितः रामचंद्रो देवता। आत्मनः अभीष्टे जपे विनियोगः।~~

अथ श्री नामत्रय मंत्रः। ॐ अस्य श्री नामत्रय मंत्रस्य। पराशर नारद भगवान् ऋषिः। विराट् छंदः। परमात्मा देवता। मम अन्तर्यामि प्रीत्यर्थे जपे वि०। मूलमंत्रेण न्यासं कृत्वा। भूर्भुवः स्वरोमिति दिग्बंधः। अथ ध्यानं। अशुभमपनयन्ताक्ष्यपक्षस्वधोर्वैरन्चलमिव सुपक्षं हैममारुह्य तार्क्ष्यम्॥ सजल इव पयोदः श्यामलः शार्ङ्गधन्वा हरमपलु मम तापं सर्वमेत्य स्वयं नः॥१॥ पंच०। जपः। मंत्रः—

१२ अथ श्री हयग्रीव एकाक्षर मंत्रः। ॐ अस्य श्री हयग्रीवैकाक्षरी मंत्रस्य। ब्रह्मा ऋषिः।
त्रिष्टुप् छंदः। श्री हयग्रीवो देवता। हकारो बीजम्। ऊकारः शक्तिः। वागैश्वर्य सिद्ध्यर्थे
जपे विनि०। ॐ ल्हां हृद०। ॐ ल्हीं शिर०। ॐ ल्हूं शिखायै०। ॐ ल्हैं कवचा०। ॐ ल्हौं नेत्र०।
ॐ ल्हः अस्त्राय०। एवं करन्यासः। अथ ध्यानम्। — धवल नलिन निष्ठं क्षीरगौरं करा
ग्रै जपवलय सरोजे पुस्तकाभीष्ट दानैः। दधत ममल वस्त्राकल्पजालाभिरामं तुरगव-
दनविष्णुं नौमि विद्याग्रविष्णुं॥१॥ पंचपूजा। जपः। मंत्रो यथा (ल्हौं [ह्स्रौं])
अथ श्री रामचंद्र महामंत्रः। ॐ अस्य श्री रामचंद्र महामंत्रस्य। बुधकौशिक ऋ-
षिः। अनुष्टुप् छंदः। सीतालक्ष्मण सहित रामचंद्रो देवता। आत्मरक्षार्थे जपे विनि०।

ॐ अंगुष्ठ० । रां तर्जनी० । मं मध्यमा० । चंद्राय अना० । नमः कनि० । ॐ रामचंद्राय नमः करतल

अथ ध्यानम् । असितकमलभासं भासयंतं त्रिलोकम् । दशरथ कुलदीपं भानवंशीय

भानुम् ॥ विलसदलसबाहुं दिव्य कोदण्डपाणिं । कनक रचित वस्त्रालंकृतं राम

मीडे ॥१॥ पंचपूजा । जपः । मंत्रो यथा- ॐ रामचंद्राय नमः ॥

अथ श्री एकाक्षरी गणेश मंत्रः । ॐ अस्य श्री एकाक्षरी गणेशमंत्रस्य । गणक ऋषिः ।

निचृद् गायत्री छंदः । श्री गणपति र्देवता । गं बीजं । ॐ शक्तिः । इष्टकामनासि

द्ध्यर्थे जपे विनियोगः । मूल मंत्रेण न्यासं कृत्वा । विघ्नांशिनी मुद्रां प्रदर्शयेत् ।

अथ ध्यानम् । रक्तोरक्तांगरागो शुक्लकुसुमयुतो स्तुंदिलश्चंद्रमौली । नेत्रैर्युक्

तस्त्रिभि वामनकरचरणो बीजपूराजनासः । हस्ताग्रा क्लृप्त पाशांकुशवरद

१४ रो नागवक्तोहिभूषो देवः पद्मासनस्थो भवतु सुरमस्तो भूतले विघ्नराजः ॥१५ पं-
चपूजा। जप॥ मंत्र गं।

अथ वागीश्वरीमंत्रः - । मंत्रान्तरं । ॐ अस्य श्री वागीश्वरी मंत्रस्य । काश्यप ऋषिः।
गायत्री छंदः । विष्णुवागीश्वरी देवता । स्फें बीजं । श्रीं शक्तिः । बीजेनैव षडंगा
नि । अथ ध्यानम् । - हेमांभां बिभ्रतीं दोर्भिः पुलपुस्तककुंभकान् । अभयं सर्व
भूषाढ्यां विष्णुवागीश्वरीं भजे ॥१॥ अथ मंत्रः - ॐ श्रीं स्फें ह्रीं नमः । पूजा० ।

अथ चिंतामणि सरस्वति मंत्रः। ॐ अस्य श्री चिंतामणि सरस्वती मंत्रस्य कण्व ऋषिः । त्रिष्टुप्
छंदः । सरस्वती देवता । ॐ बीजं । ह्रीं शक्तिः । ॐ ह्रीं ह्रां ह्रीं ॐ हृदये । ॐ ह्रीं ह्रीं ह्रीं शिरः ।
इत्यादिअंगन्यासः । अथ ध्यानम् । हंसारूढां हरभसित हारेन्दुकुन्दावदा । तांवाणी मंदस्मित युत-

मुक्तामौलिन्यर्धेन्दुरेखनाम् । विद्यावीणामृतमयघटास्त्रगादारहस्ता शुभ्राब्जस्थाभव
दभिमत प्राप्तये भारती स्यात् ॥१॥ मंत्रः- ॐ ह्रीं ह्रं सौं ह्रीं ॐ सरस्वत्यै नमः । इति ।
अथ अक्षरन्यासः —— मूर्ध्नि भ्रू मध्य श्रोत्रनयन नासापुट द्वय वदन गुह्य पादांगुष्ठेषु वर्णान्न्य
सेत् । प्रागुक्त दशाक्षरी पीठे समावाह्य समर्च्चयेत् । तत्र केशव्याः पार्श्वेषु । ऐं संस्तुतायै नमः ।
ऐं भाकृतायै नमः । इति अंगैः प्रथमावृत्तिः । ॐ ऐं प्रज्ञायै० । ॐ ऐं मेधायै० । ॐ ऐं श्रुत्यै० ॐ
ऐं स्मृत्यै० ॐ ऐं शक्त्यै० । ॐ ऐं वागीश्वर्यै० । ॐ ऐं सुमत्यै० इति द्वितीयावृत्तिः । मातृभि
स्तृतीयावृत्तिः । ~~एवं संपूज्य द्वादशलक्षं जपेत्~~ इंद्रादिभिः चतुर्थी । वज्रादिभिः पंचमी ।
एवं संपूज्य द्वादशलक्षं जपेत् । । द्वादशसहस्रं पुरश्चरण होमः ।
द्वितीय सरस्वतीमंत्रः । ॐ अस्य श्री सरस्वती मंत्रस्य । कण्व ऋषिः । अनुष्टुप् छंदः । वागी-

१५ सरस्वती देवता । ऐं बीजं । ह्रीं शक्तिः । विद्यार्थे जपे विनि० । ऐं ह्रां हृदये । ऐं ह्रीं शिरसि । इत्या-
द्यंगानि । प्रागुक्तचिंतामणिवत् पूजाध्यानम् । ॐ ह्रीं ग्लौं सरस्वत्यै नमः ह्रीं ॐ । इति मंत्रः ।
अथाक्षरन्यासः - । ब्रह्मरंध्रे भ्रुवोर्मध्ये नेत्रयोः नासिकयो रसयो लिंगे गुदे जघन्यस्य समस्तेन
व्यापकत्रयं कुर्यात् । एवं न्यस्य द्वादश लक्षं जपेत् । त्रिमधुरसिक्तैः सितसरसिजैः द्विशतोत्तर सह-
स्रं पुरश्चरणहोमः ।
अथ मंत्रांतरम् - । ब्रह्मा ऋषिः । जगती छंदः । वाग्देवी देवता । ऐं बीजं । स्वाहा शक्तिः । विद्यार्थे
जपे वि० । ऐं हृदये । नमः शिरः । भगवती शिखा । वद वद कवचं । वाग्देवी नेत्रम् । स्वाहा अस्त्रम् ।
अथ ध्यानम् । शुभ्रां स्वच्छविलेपमाल्यवसनां शीतांशुखंडोज्ज्वलाम् । व्याख्यामक्षगुणं सुधाढ्य १५
कलशं विद्यां च हस्तांबुजे । बिभ्राणां कमलासनां कुचनतां वाग्देवतां सुस्मितां । वंदे वाग्वि-

भन प्रदां त्रिनयनां सौभाग्य संपत्करीम॥१॥ ऐं नमो भगवति वद वद वाग्देवि स्वाहा।

इति मंत्रः। लक्षजपः। आज्यासितैः स्तिलैर्दशांश पुरश्चरणहोमः॥ दशाक्षरवत् पूज्य

वद वद वाग्वादिनि स्वाहा दधि तुभ्यं नमः। इति मंत्रः॥

अथ प्रसंगात् नकुली सरस्वती मंत्रोपि लिख्यते।– विश्वामित्र ऋषिः। त्रिष्टुप् छंदः। नकुली

सरस्वती देवता। सारस्वते मम वाक् जपे वि०। वाग्बीजत्रितयेनानुलोम प्रतिलोमेन ष

डंगानि। अथ ध्यानम्।– ओष्ठाभ्यां पिहितैश्च पंक्तिनिसितैर्दंतैर्घनैः संवृतां। वी–

क्षणा वाग्निवदन्त्र सर्व जगतां या स्वामिनी संततम्॥ सा मां वाक करोतु वाङ्निपुणं सर्वत्र

सा वागसा। येन स्यामहमेव सर्व जगता मत्यर्थ मग्रे सरः॥१॥ नार्क्षारूढ महित लक्षिता

वालु जन्मा विशंका। चंचद्दीनाकर लवभुकी चक्र शंख वासि पाणिः॥ चंद्रांतसा मनसि

१६ नकुली राजगुह्यामलायाः। पत्यंगत्वं परिगतवती प्रत्यहं मामकी नः॥२॥ ऐं। ओष्ठापिधा-
ना नकुली। क्लीं। दंतैः परिवृता पविः॥ सौः। सर्वस्यैवाच ईशाना चारुभाषि हृपाद्वदेत्॥१॥
अथ प्रयोगः।- पिबेत्तन्मंत्रितं तोयं प्रातःकाले दिने दिने। विद्वान्वत्सवत्सो मंत्री भवेन्नाच
विचारणा॥ प्रयोगान्तरम्-॥ अभिषिंचेच्च तैर्जिह्वे सालानं स्नानकर्मणि॥ तर्पयेत्तां जलैः
शुद्धैः रत्तेमेधामवाप्नुयात्॥ प्रयोगान्तरम्-॥ पुष्पगंधादिकं सर्वं तज्जलं धारयन्सुधीः। सभा-
यां पूज्यते सम्यग्वादे च विजयी भवेत्॥३॥ अथ न्यासः। ' स्र सर्पवीरमीतें बाधमाना' इत्यनेन
मूलाधारमारभ्य नाभिपर्यंतं न्यसेत्। ' बृहन्निमाय जमदग्नि दत्ता' इति हृदयपर्यंतं न्यसेत्।
' ~~अवोदेवश्वशुरमनुं मिमीते~~ ' आसूर्यस्य दुहिता तत' इति कंठपर्यंतं न्यसेत्। ' अवोदेव श्वमृ
तत्यमर्जुर्यं मिति' तत आरभ्य मूर्धपर्यंतं न्यसेत्। पुनः अस्या ऋचः प्रथमपादेन अधरोष्ठस्य

दक्षिणभागे ह्रीं द्वितीयेन उत्तरोष्ठस्य दक्षिणभागे। तृतीयेन उत्तरोष्ठस्य वामभागे। चतु-
र्थेनाधरोष्ठस्य वामभागे च न्यसेत्। अथाक्षरन्यासः। नकुलि मंत्राक्षरैः प्रादक्षिण्येन
वदनं न्यसेत्। समस्तेन जिव्हाग्रे।

अथ सरस्वती मंत्र प्रसंगात् मेधाधारणासरस्वती मंत्रोऽपि लिख्यते। व्यास भगवान् ऋषिः।
त्रिष्टुप् छंदः। मेधाधारणासरस्वती देवता। मेधाधारणार्थे जपविः। यश्छंदसामृषभो
विश्वरूपः॥ इत्यादि "श्रुतं मे गोपाय" त्यंतं। ऐं नमो ब्रह्मणे धारणं मे अस्त्वनिराकरणं धा-
रयीता॥ भूयासं क्लीं कर्णयोः श्रुतं मच्योममुष्य ॐ सौंः॥ इति मंत्रः

अथ राजमातंगी मंत्रप्रसंगात् सुरेन्द्रसंहितोक्त प्रकारेण। लघुमातंगी मंत्रोऽपि लिख्यते॥ अं-
गिरा ऋषिः। अनुष्टुप् छंदः। लघुश्यामला देवता। ऐं बीजं। स्वाहा शक्तिः। ऐं नमः हृत्। उच्छिष्ट
शिरः। चांडालि शिखा। मातंगी कवचं। सर्ववशंकरि नेत्रं। स्वाहा स्त्रं। अथ ध्यानम्-।

१८ दिव्यामृतरसांभोधौ रत्नद्वीपमनोहरे । कदंबकानने रत्नमंडपान्ते महेश्वरी ॥ ध्यायेत् ॥
देवि सिंहासनासीना प्रसन्नवदनांबुजा । इंद्रनीलमणिश्यामा नवनीलोत्पलश्रियम् ॥
रत्नांशुकपरीधानां यावकादिपदांबुजां । उल्लसद्यौवनतारुण्यां समुन्नतपयोधरां ॥ पीयूषो
दधिसंभूतौ कंबुकुंडलमंडिताम् । विनम्रकामकोदंडसौंदर्यविजयी भ्रुवं ॥ बिंबाधरां । स्मित
ज्योत्स्ना कपोलफलकोज्वलाम् । लसत्कुंगशावाभिर्नासाकलितमौक्तिकाम् ॥ पृष्ठ-
दशोल्लसत्कोलवेलच्चामरवेणिकाम् । कस्तूरीतिलकांचारुचंद्ररेखावतंसकाम् ॥ दिव्यचंद-
नसंदिग्धां मदाघूर्णिविलोचनाम् । मुक्ताप्रवालावालिभिर्विभूषितपृथुस्तनीम् ॥ मेखलाहार
केयूरमंजीरसमलंकृताम् । विद्युत्कणितविभ्रमविश्रांतां भ्रांतमानसाम् ॥ स्विद्यत्कपोलफल-
कां मालोलालकवल्लरिं । लसत्कदंबकल्हारप्रसूनैस्तु विराजिताम् ॥ लिकाशुकं भुक्षयंतीं १८
चतुराम्नायपद्धतिम् । आत्मैकसुमुखीभूतां रश्मिभिः परिवारिताम् ॥ ध्यात्वा ह्येवं महा
देवीं निश्चलेनांतरात्मना । साधकः परया भक्त्या भुक्तिं मुक्तिं च विंदति । ऐं नम

उच्छिष्ट चांडालि मातंगि सर्व वशंकरि स्वाहा॥ इति विंशत्यक्षरो मंत्रः॥ विद्यैश्वर्य गान
वश्य प्रधानोऽयं मंत्रः। कलौ कलि जित काले साधकस्य प्रसीदति। लघु शीघ्रेण तेनेयं
लघुश्यामेति गीयते॥१॥ दशलक्षं जपेत्॥ किंशुक पुष्पैर्वा जपाकुसुमैर्वा रक्तकरवीरै
र्वा मधुक पुष्पैर्वा त्रिमधुसिक्तैरयुतं जुहुयात्॥ पुरश्चरणार्थं॥ यस्तु विंशति लक्षाणि
पूर्ववत्प्रजपेन्मनुं। जुहोति च यथा पूर्वं तस्य प्रत्यक्षतां व्रजेत्॥ किंशुकं मधुकं इक्षुप्रसु॥
अथ पूजा॥ प्रतिमायां पटे पात्रे स्त्रियोनौ चापि पुस्तके। कन्यामूर्तौ तथा स्वबिंदु यंत्रे वा-
मन दर्पणे॥१॥ धनलाभो ग्रामलाभः कन्यालाभः स्तथा परः। मुक्तो भवेन्मंत्रिणो नित्यं प्रति-
मायां प्रपूजयेत्॥२॥ डाकिनी शाकिनी दोष शांतये पट पूजनम्। पात्रस्तु यो यजेद्देवीं धना
ढ्यः सोऽचिराद्भवेत्॥३॥ सर्व सौभाग्य संपत्ति वश्याकर्षण सिद्धये। योनिचक्रे तु
संस्थायाः पूजनं कुलनाशने। महाभयस्य शांत्यर्थं सर्वविघ्नविशुद्धये॥४॥ पूजनं कन्यका
मूर्तौ स्वबिंदु शत्रुवधाय मे। अणिमाद्यष्टकं यंत्रे दर्पणे वश्य कर्मणि॥५॥ सिद्ध्यष्टकैव

विज्ञानं भवेद्ध्रुवः पुस्तकेऽर्चनात्॥ त्रिपंचाष्टदशाष्टारकवसुपत्रकं। चतुरस्रं भवेद्देव्याः
पूजायंत्रं वरानने॥ अस्मिन् यंत्रमंडले मूलाधारात् वामनाडिद्वारेण हृदयामंत्रेण महादे-
वीं समावाह्य योनिमुद्रां त्रिशिखपरत्वावसरं वक्ष्यमाणां प्रदर्श्य कवचमंत्रेणोद्धूलनं
कुर्यात्॥ शिरोमंत्रेणाभ्यंजनं नेत्रे। मंत्रेण तीर्थाभिषेचनं। आचमनम्। शिरोमंत्रेण कु
सुमानि वासः। पुनराचमनं। मंत्रेण तेनैव दीपालंकारांश्च दद्यात्। पुनरंगैः प्रथमा-
वृत्तिः। पुरः त्रिकोणेषु ऐं रत्यै नमः। ऐं प्रीत्यै०। ऐं मनोभवायै०। इति (सर्वं)। पुनरपि त्रि
कोणे छवस्वरेभ्यो नमः। रागेभ्यो नमः। रागिणीभ्यो०। इति भामभ्यर्च्य। पुनरपि तत्रैव त्रिको-
णेषु। इच्छाशक्त्यै०। ज्ञानशक्त्यै०। इति कामर्चयेत्। वाग्भवं पूर्ववत् मंत्रादौ सर्वत्र योज्यं।
पुनस्तत् बहिर्यंत्रकोणे। द्रां वनबाणाय०। द्रीं क्षोभनबाणाय०। क्लीं वशीकरणबाणाय०।
ब्लूं श्रीं आकर्षणबाणाय०। सः हं मौनबाणाय। इति समर्च्य। तद्बहिरष्टपत्रेषु।

सुभगायै०। भगायै०। भगसर्पिण्यै०। भगमालिन्यै०। अनंगायै०। अनंगकुसुमायै०। अनंग-
मदनायै०। इतिसमर्च्य। तद्बहिरष्टदलेषु अष्टदले मातृभिर्यजेत्। तद्बहिः षोडशदले।
ऊर्वश्यै मेनकायै०। रंभायै०। घृताच्यै०। पुंजिकायै०। सुकेश्यै०। मंजुघोषायै०। महारंगायै०।
यक्षकन्यायै०। गंधर्वकन्यायै०। सिद्धकन्यायै०। किंनरकन्यायै०। उरगकन्यायै०। विद्या-
धरकन्यायै०। किंपुरुषकन्यायै०। पिशाचकन्यायै०। इतिसमर्च्य। तद्बहिरष्टपत्रेषु।
अणिमादिसिध्यष्टकेन समर्चयेत्। तत्र पूर्वादि दिक्षु चतुष्टयं ईशानादि दिक्षु चतुष्टयं च।
पूर्वामतः उच्छिष्ट पादुकायै०। इतिसमर्चयेत्॥ इति सुरेन्द्र संहितोक्त लघुमातंगी पूजाविधिः॥

अथ मातंगीश्वरी मंत्रप्रसंगात् क्लीयत्व साम्येन स्वयंवरमंत्रविधाने मंत्र स्मरोक्त मपि
योग्यतावशात्किंचिल्लिख्यते। ब्रह्मा ऋषिः। दैवीगायत्री छंदः। जगन्माता श्री पार्वती देवता। वैलो
क्यस्य(व)स्य मोहिनी हृत्। जगत्रय(व)स्य मोहिनी शिरः। उरग(व)स्य(प) मोहिनी शिखा।
राज(व)स्य मोहिनी कवचं। स्त्रीपुरुषवशंकरि नेत्रम्। सर्वस्त्रीपुरुषमुख हृदयं मम वशं कुरु-

१२ कुरु स्वाहा मंत्रः । अथवा । ह्रां हृत् । ह्रीं शिरः । इत्यादि षडंगं कुर्यात् । अथ ध्यानम् । बाला-
र्कायुत सप्रभां करतले लोलंबमाना कुलां । मालां संदधतीं मनोहर तनुं मंदस्मितोद्यन्मुखीं ।
मंदं मंदमुपेयुषीं वरयितुं शंभुं जगन्मोहिनीं । वंदे देव सुरेन्द्र वंदित पदामिष्टार्थ दां पार्वतीं
॥१५॥ ह्रीं योगिनि योगिनि योगेश्वरि योगेश्वरि योगभयंकरि सकल स्थावर जंगमस्य मुख
हृदयं मम वशमाकर्षयाकर्षय स्वाहा । इति मंत्रः ॥
श्री ॥ अथ रमा मंत्र प्रसंगात् कल्पांतरोक्तोऽपि रमामंत्रो लिख्यते । ब्रह्मा ऋषिः । गायत्री छंदः ।
रमाभिधा देवता । श्रीं बीजम् । स्वाहा शक्तिः । श्रीं हृत् । स्वाहा शिरः । श्रीं शिखा । स्वाहा
कवचं । एवं प्रकारेण षडंगानि । अथ ध्यानम् । तडिच्छोभापूर्णां तपनशशितारंक मुक्ता-
गुल्कां । स्फुरन्हिंवां क्षोमां शुक(च)दनाभी सरसिजां ॥ दरस्मेरां धीरां करकलित पद्मां
ढिलनयनां । रमां विद्यां वंदे वरपुरुषवामोरुनिलयाम् ॥१॥ ॐ श्रीं नमो भगवति सर्व सौभा
ग्यदायिनि श्रीं श्रीं विद्ये महाविभूतये स्वाहा ॥ इति मंत्रः ॥ वर्णलक्षं जपः ॥ पायस वा- १२
ज्याहुतिभिः वर्णसहस्रं जुहुयात् । पुरश्चरणार्थं । अथ यंत्रम् । मध्ये स्वाहाऽवधेर्न

प्रसिद्धमुकुले वर्णे मालिखेद्यथा हृद्यं। लिख्यान्वर्णान्द्वारे शिखिनि पुरभवने शिष्टवीजं तु
लक्ष्म्याः॥ वासे पत्राग्रदर्णे प्रणवपरिवृतं स्वेष्टसाध्यं च रामा। लक्ष्मीयंत्रं त्रिभुवनविभवं
श्रीप्रदं दिव्यदिव्यम्॥१॥ अस्यार्थः। प्रथममष्टपत्रं विलिख्य मध्ये स्वाहा शेतिवर्णद्वयम्
तन्मध्ये मायाबीजं ससाध्यं दलेषु मंत्रवर्णद्वंद्वं तद्बहिर्दिशदलेषु मंत्रं वर्णैकैकं। तद्बहिः
षष्ठकोणं तेषु लक्ष्मीबीजं। तद्बहिर्वृत्ते मातृकां तद्बहिः प्रणवेन वेष्टयेत्।
अथ लक्ष्मीमंत्रांतरं लिख्यते। दक्षऋषिः। विराट्छंदः। श्रीर्देवता। ॐ बीजं स्वाहाशक्तिः। ॐ देव्यैनमः
हृदये। ॐ पद्मिन्यैनमः शिरः। विष्णुपत्न्यैनमः। शिखा। ॐ वरदायै० कवचं। ॐ कमलरूपायै० नेत्रं।
नमास्त्रं। ध्यानं। - पद्मास्या पद्मनेत्रा कमलयुगवराभीतियुग्दोः सरोजा। देहोत्थाभिः प्रभाभि
स्त्रिभुवनमुखी भासुराभासयंती॥ मुक्ताहाराभिरामोन्नतकुचकलशारत्नमंजीरकांचि। ग्रैवेया
द्यैर्गहात्या धृतमणिमुकुटा श्रेयसे श्रीर्भवेद्वः॥ नमः कमलवासिन्यै स्वाहा॥ इतिमंत्रः॥ ऐश्वर्य
प्रदानोऽयंमंत्रः। दशलक्षं जपेत्। त्रिमधुरसिक्तैः कमलैरयुतं जुहुयात्। पुरश्चरणार्थं। अथ पूजाविधिः॥

पूर्ववत् पीठं संपूज्य। तस्मिन्देवीं समावाह्य समर्चयेत्। प्रथमम् अष्टपत्रमूलेषु प्रथमावृत्तिः। लक्ष्म्यै नमः।
श्रियायै०। कमलायै०। वनमालिकायै०। विभीषिकायै०। द्राविकायै०। शाङ्कायै०। वसुमालिकायै०। द्वादशद-
लेषु द्वितीयावृत्तिः। लोकपालदलान्ते तृतीयावृत्तिः। अथ प्रयोगः। समुद्रगायामवतीर्य नद्यां स्वकण्ठमात्र उद-
के स्थितः सन्॥ त्रिलक्षजाप्यादस्य तमोऽमात्रं मंत्रीभवन्नाप्नोत्यारणीयं। प्रयोगान्तरं। नद्यावर्ते जुहुत
भगमेऽभ्यर्च्य लक्ष्मीं सहस्रं। तान्च विल्वैः त्रिमधुप्लुतैर्वा फलैः पौर्णिमास्याम्। पंचम्यां वा सितसर-
सिजैः शुक्रवारे सपुष्ये। वर्षे मासं प्रतिहुतविधिः वत्सरात्स्याद्धनाढ्यः॥ १॥ अथ भर्थः॥ भगम-
उत्तराफाल्गुनि नद्यावर्त पुष्पैः विल्वैः फलैस्त्रिमधुरासिक्तैर्वा सहस्रं जुहुयात्॥ अथवा पौर्णिमास्यां
वा पंचम्यां वा श्वेतैः सरसिजैः प्रतिमासं जुहुयात्॥ अथवा प्रतिशुक्रवासरमंन्यैर्वर्धवलैः पुष्पैर्जु-
हुयात्। एवं कृते वत्सरात् धनाढ्यो भवति॥

अथलक्ष्मी मंत्रांतर मुच्यते। दक्ष ऋषिः। विराट् छंदः। श्रीर्देवता। श्रीं बीजं। ह्रीं
शक्तिः। ॐ श्रीं ह्रीं श्रीं कमले श्रीं ह्रीं श्रीं ॐ। हृत्। ॐ श्रीं ह्रीं श्रीं कमलालये श्रीं ह्रीं श्रीं
ॐ। शिरः। ॐ श्रीं ह्रीं श्रीं प्रसीद श्रीं ह्रीं श्रीं ॐ। शिखा। ॐ श्रीं ह्रीं श्रीं प्रसीद श्रीं
ह्रीं श्रीं ॐ। कवचं। ॐ श्रीं ह्रीं श्रीं महालक्ष्म्यै नमः श्रीं ह्रीं श्रीं ॐ। अस्त्रं। अथध्यानं।
हस्ताद्यद्युसुपत्र पंकजयुगादर्श स्फुरन्नूपुरा। ग्रैवेयांगद हारकंकणमहामौलीज्वल
त्कुंडला। पद्मस्थापरि वारिकापरिवृता शुक्लांगरागांशुका। देवी दिव्यगणावृत्ता
भवदघप्रध्वंसिनी स्यादिमा ॥१॥ मंत्रः— ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्र
सीद प्रसीद श्रीं ह्रीं श्रीं महालक्ष्म्यै नमः। इति सप्तविंशत्यक्षरः महालक्ष्मीमंत्रः।
ऐश्वर्य फलदानोयं मंत्रः। लक्षं जपेत्॥

२१ अथ मूलदुर्गाविधानं उच्यते। श्री नारद ऋषिः। गायत्री छंदः। मूलदुर्गा देवता।
दुं बीजं। ह्रीं शक्तिः। ॐ ह्रीं दुर्गायै ह्रीं हृत्। ॐ ह्रीं दुर्गायै ह्रीं। शिरः। इत्याद्यं-
गानि। अथ ध्यानम्। शंखारिचाप शरभिन्नकरां त्रिनेत्रां। तिग्मेतरांककलयाऽवि
लसत्किरीटां॥ सिंहस्थितां ससुरसिद्धनतांच दुर्गां दुर्वानिभां दुरितवर्गहरां न-
मामि॥१॥ ॐ ह्रीं दुं दुर्गायै नमः॥ इति मंत्रः॥ अष्टलक्षं जपेत्॥ सर्पिःसिक्तेन
क्षीर पायसेन वा, मधुरा प्लुतै स्तिलै र्वा अष्टसहस्रं जुहुयात्॥ इति पुरश्चरण होमः॥
अथ दुर्गा मंत्र प्रसंगात् शारदातिलकोक्त महिषमर्दिनी मंत्रोऽपि लिख्यते॥
नारद ऋषिः। गायत्री छंदः। महिषमर्दिनी दुर्गा देवता। महिषासुरहिंसे हुं फट्
हृदये। महिषासिनी हुं फट् शिरः। महिषं भिषय भि० हुं फट् शिखा। महिषं हन २१

हन देवी हुं फट् कवचं । महिष निकर्दिनी हुं फट् अस्त्रं । ध्यानम् ।- गारुडोपल
सन्निभां मणिमालि कुंडल मंडितां नौमि भाल निबोम्नतां महिषोत्तमांग निषेदुषी
चक्र शंखकृपाण खेटक बाण कार्मुक शूलकां तर्जनीमपि विभ्रतीं निजबाहुभिः श-
शि शेखरां ॥१॥ महिषमर्दिनि स्वाहा । इति मंत्रः । अष्टलक्षं जपः ।
अथ त्वरितविधानं उच्यते । अर्जुन ऋषिः । विराट् छंदः । त्वरिता पार्वती देवता ॥
हूं बीजम् । ह्रीं शक्तिः । खेचच हृदये । चेक्षे शिरः । क्षः शिखा । स्त्रीं कवचं । स्त्रीं
हूं नेत्रम् । क्षे अस्त्रं । अथ ध्यानम् । श्यामतनुमरुणपंकजाचरणतलां नूपुरनाग-
मंजिरां ॥ बर्हांशुकपरिधानां वैश्याहि दुकूमेखलां कालितां ॥ तनुमध्यलतां पृथुक-
स्तन युगलां करवीरावतंस्य वरां शिखिपिच्छनालवलयांगुंजाफलगुणितभूषणा

२२ स्फुरितां ॥ नृपफणिकेयूरांतांगळविळसद्विविधमणियुताऽभरणां ॥ द्विजनाग

कुंडळमंडितगंडद्वयीं मुकुरभांश्यौ शोणतरां ॥ धरपल्लवबिंदुममणिभासुराप्रसंन्ना

च ॥ पूर्णशसिबिंबवदनामरुणायित लोचनत्रयिनळिनां ॥ कुंचितकुंतळविळसन्मुकु

राद्य   रिताहिर्पैरिशिपिच्छयुतां केशांतिवनकुसुमोज्वळां मयूरपत्रकेतनिकां सुर

न्चिरसिंहासनगां विभ्रमसमुदायमंदिरांतरुणीं ॥१॥ ॐ-ह्रीं हुं खेच्छेक्षः स्त्रीं हं

क्षें-ह्रीं फट् स्वाहा । इति मंत्रः । क्ष्वेळग्रहादिहरणप्रधानोऽयं मंत्रः ॥ कालिक गळतभा

भिर्गुह्येषु जानुजंघयोः पादयोः ॥१॥ देहं न्यासं कुर्यात । मंत्रेण व्यापकं समस्तेन एकलिं-

गादिषु स्थानादिषु शक्तिमार्गे ० लक्ष जपः ॥ त्रिमधुसिक्ताभिः बिल्वसमिभिर्दशांशं जुहुया २२

त् । इति पुरश्चरण होमः ।

॥अथ श्री अन्नपूर्णा मंत्रः ॥ ॐ अस्य श्री अन्नपूर्णा मंत्रस्य । शिव ऋषिः । विराट् छंदः ।
अन्नपूर्णा देवता । ह्रीं बीजं । स्वाहा शक्तिः । धर्मार्थकाममोक्षार्थे जपे वि० । ध्यानम् —।
उद्यत्भानुनिभां दुकूलवसनां क्षीरोदमध्ये शुभे । मूले कल्पतरो स्फुरन्मणिमये सिंहासने
संस्थितां ॥ बिभ्राणां भुजयोः सुवर्णकलशं बीजं च कल्पोद्भवं । भक्ताभीष्टवराभयां जाद्वे
पुरां ध्याये अन्नपूर्णेश्वरीं ॥१॥ ह्रीं नमो भगवति माहेश्वरी अन्नपूर्णे स्वाहा ॥ इति मंत्रः ॥
अथ श्री धरणी मंत्रविधानमुच्यते । वराह ऋषिः । निचृत् छंदः । श्री धरणी देवता । ग्लौं बीजं
। स्वाहा शक्तिः । ॐ नमो हृत् । भगवत्यै शिरः । धरण्यै शिखा । धरे कवचं । धरे नेत्रं । स्वाहा
अस्त्रं । अथ ध्यानम् ।— मुरव्यां भोजे निविष्टारुणचरणतला श्यामलांगी मनोज्ञा । चंचच्छ्या-
त्पयग्रयुग्म च्छुक कलितकरा प्राप्त नीलोत्पलाद्या ॥ ध्वक्रा कल्पाभिरामा मणिमयमुकुटा चित्र-

सन्ना प्रसंन्ना । दिश्याद्विश्वंभरा नः सततमभिमतं वल्लभा केठभारी ॥१॥ ॐ नमो
२३ भगवत्यै धरण्यै धरणि धरे धरे स्वाहा । इतिमंत्रः । दशांशं सर्पि सिक्तेन पयोन्नेनपु
रश्चरणहोमः । अथपूजा । वैष्णवपीठे समावाह्य । अंगैः प्रथमावृत्तिः । भूम्यात्मनेनन-
मः । वन्ह्यात्मने० । आवात्मने० । आप्राणात्मने० । इति दिग्दलेषु । इति द्वितीयावृतिः ।
इन्द्रादिभिस्तृतीयावृतिः । निवृत्त्यै० । विद्यायै० । शान्त्यै० । इतिकोणदलेषु । अथप्रयोगः ।
पुष्पैः प्रियंगोर्मधुरत्रयाक्तैः नीलोत्पलैर्वापि तथाऽरुणैस्तैः । सहस्रमानं प्रतिजुव्हतः
स्यात्गौर्भोमती सस्य कुला कुलाच ॥१॥ प्रियंगु पुष्प चाळरमु नीळोत्पलं ॥ रक्तोत्पलं ॥ अथ
मर्थः । प्रियंगु पुष्पैः मधुरसिक्तै र्वा नीळोत्पलै स्त्रिमधुरसिक्तै र्वा रक्तोत्पलै र्वा सहस्र संख्या
केषु हुयात् । तस्य भूमिः पशुपसिंन्यस्यात् । समृधिं मतिंच जायेत ॥ प्रयोगान्तरं ॥ २३

मिपीजरं पृथुल शालि मंजरी योऽनुहोति भवतिश्च विस्तृतामही। शालीमंजरीपसादि

महीपि धन्यमंजरिणन्यिस्यात्॥१॥ अयमर्थः। स्वर्णवर्णं रिपुच्छान्य शालिमंजरिं त्रि-

मधुरसिक्तां नित्यशः॥ शतसंख्या यो जुहोति। एवं मंडले कृते भूमिर्लभ्यते। प्रयोगान्तरं।

भृगोस्सुवारे निजसाध्यभूमेर्मृदविलोलितांभः परिपक्कमद्यः। पयोधृतेनक्तं जुहुयात्

सहस्रं दुग्धेन वा तेन दिनांतरेच॥१॥ षण्मासादिषु भृगुवासरे सैव होमः॥ संपन्नं स-

मुपैत्यग्रप्रदेशान्युत्सान्वा पशुमहिषिप्रपुष्टि जुष्टामप्यनुदिन मिन्दिरां समग्रंम्॥१॥

अयमर्थः॥ शुक्रवारे स्वस्यसाध्यक्षेत्रस्य मृदं गृहीत्वा तां जले विलोडय तेनजलेन हविः परिपच्य

पद्मक्षीर घृताभ्यां सिक्तेन तेन हविषा सहस्रसंख्यं जुहुयात्। तस्य साध्यभूमीसकलाधिसंप-

न्नाजायते॥ पुत्रमहिषादयश्च जायन्ते॥

(वन)
२८ अथ नवदुर्गा विधान मुच्यते। आरण्यक ऋषिः। अनुष्टुप् छंदः। वनदुर्गा देवता।
दुं बीजं। स्वाहा शक्तिः। उत्तिष्ठ पुरुषि हृत्। किं स्वपिषि शिरः। भयं मे समुपस्थितं
शिखा। यदि शक्यमशक्यं वा कवचं। तन्मे भगवति शमय स्वाहा अस्त्रं। अथ ध्यानं।
अरि शंख कृपाण खेट बाणान्। सं धनुः शूलक तर्जनी दधानां॥ भवतां महिषोत्त
मांग संस्था वनदुर्गा सदासि प्रीतये स्तु दुर्गा॥१॥ चक्र शंख कृ खेटक शर कार्मुक
शूल संज्ञक कपालैः मुष्टि मुसल कुदनंदकवलक गदा भिंडिपाश शक्त्याद्यैः॥ उद्य-
द्विकृती भुजाद्या महिष केश जल जलद संकाशा सिंह स्थामा गेननि भां यप्रस्था वाथ मकर
श्यामाः व्याघ्र त्वक् परिधाना सर्वाभरणान्विता त्रिनेत्रा याश्रिहिकलीन सुनील कुंचीत २८
कुंतल विलसत्किरीट शशिसकला सपादि वलय नूपुर कांची केयूर हारभिं नागसूर दीप्ति

जाभयभयदा ध्येया कात्यायनि प्रयोगनिधौ ॥ प्रयोगविधौ रक्षानिग्रहादावित्यर्थः ॥

इति ध्यानम् । उत्तिष्ठ पुरुषि किं स्वपिषि भयं मे समुपस्थितम् । यदि शक्य मशक्यं वा तन्मे भगवति शमय स्वाहा ॥ इति मंत्रः ॥ उपद्रव शान्ति तितिक्षा प्रधानोऽयं मंत्रः । पदद्वय संधि गुह्यं (ध्वाघुणारे) दरपार्श्व हृत् स्तनेषु गलोदो संधि वदनानास कपोळ पर्ण युक् भ्रुकेन्यसेत् ॥ इत्यक्षरन्यासः ॥ चतुर्लक्षं जपः ॥ व्रीहि छाज हविभिर्दशांश पुरश्चरण होमः ॥ अ

अथ त्रिपुरा विधान मुच्यते । संमोहन ऋषिः । गायत्री छंदः । त्रिपुरादेवी देवता । ॐ बीजं । क्लीं वा हीं शक्तिः । श्रीं हृत् । श्रीं शिरः । इत्याद्यगानि । -हां हृत् । -हीं शिरः । इत्यादि वा । श्री हृत् । हीं शिरः । क्लीं शिखा । श्रीं कवचं । हीं

२५ ह्रीं नेत्रम्। क्लीं अस्त्रं। इति न्यासान् कुर्यात्। अथ ध्यानम्। - नवकनकभासुरो-
र्वीरुचिते मणिकुंडलक्षमे सकल्पतरो। रत्नबद्ध सिंहासनस्थां निहितसरोरुहे समान
सीनां ॥१॥ आबद्ध रत्न मुकुटं भानि कुंडलोघ केयूरकोर्मि भूषणा न्यस्त नूपुराढ्याम्॥
ध्यायेत् धृताब्जयुगपाशकरां कुशेक्षु चांपासपुष्पविशिखां नवहेमवर्णां॥ चामर मुकुर
समुद्गकरां कुळके रडवा हि निमीलन्हती भी॥ समभिवृतां पश्यंती साधकं प्रसन्नदृशाः॥
श्रीं ह्रीं क्लीं। इतिमंत्रः। द्वादशलक्षं जपेत्। श्रीवृक्षसमिधिद्भिश्च राजवृक्ष समिभिश्च
जपांते त्रिमधुरसिक्तं द्वादशसहस्रं पुरश्चरण होमः। श्रीवृक्ष बिल्व राजवृक्षं कोणइज
पालिवं जपापुष्पम्। केवल पंचभुवनेश्वरी पीठे समावाह्य समर्चयेत्। अंगैः प्रथमा
वृतिः। लक्ष्मै नमः। गिरिजायै०। शर्वाण्यै०। रत्यै नमः। अंगजायै०। इतिषट्कोणे।

समर्पयेत्। एवं द्वितीयावृत्तिः। मातृभिर्त्रितीया। पुनर्यंद्रादिभीः स्वरूपे लोकपा-
लै श्चतुर्थावृत्तिः। अस्य मंत्रस्य फलमुच्यते। सकल वर्ग फला यशस्करं जगती
रजन कवीताकरं॥

॥ अथ शूलिनी विधानमुच्यते। दीर्घतमा ऋषिः। ककुप्छंदः। श्री शूलिनी दुर्गा
देवता। हुं बीजां स्वाहा शक्तिः। शूलिनी दुर्गेश्वरी हुं फट् शिरः। देवी सिध्द सुपूजिते
नंदिनीं मां रक्षरक्ष महायोगेश्वरी हुं फट् हृत्। शूलिनी वरद देवसिध्द सुपूजित नंदिनी
मां रक्षरक्ष महायोगेश्वरी हुं फट् शिरः। शूलेशि विष्णवासीना देवसिध्द पुजिते
नंदिनी मां रक्षरक्ष महायोगेश्वरी हुं फट् शिखा। शूलिनी असुर मर्दिनी देवसिध्द सुपूजिते
नंदिनी मां रक्षरक्ष महायोगेश्वरी हुं फट् कवचं। शूलिनी युध्द प्रिये त्रासय त्रासय देवसिध्द
सुपूजिते नंदिनी मां रक्षरक्ष महायोगेश्वरी हुं फट् अस्त्रम्। अथ ध्यानम्। —

२८ बिभ्राणा शूलबाणास्यरिसदरगदाचापपाशान्कराब्जैर्मेघश्यामा किरीटोल्लिखितजलधरा भीषणा भूषणाढ्या। सिंहस्कंधाधिरूढा चतसृभिरसीखेटहस्ताभिरुग्राभिः कन्याभिर्भिन्नदैत्या भवतु भवभयध्वंसिनी शूलिनी नः॥१॥

ज्वलज्वल शूलिनी दुष्टग्रह हुं फट् स्वाहा। इति शूलिनीमंत्रः पंचदशार्णः।

'ज्वलज्वल पदान्ते च शूलिनीति पदं वदेत्। दुष्टग्रह हनस्यान्ते वन्हिजायावधी मनुः॥

पंचभिर्दशभिः प्रोक्तो ग्रहशत्रुनिवारणः ॥इति शारदा पद्यम्॥ हुल्लू शादिर्वीति प्रकार्यं शारदातिलके तु शूलिनि पदमपि विस्यष्टादशार्णोयं मंत्रः। रक्षाप्रधानोऽयं मंत्रः। पंचदशलक्षं जपेत्। आज्येनाज्यासिक्तहविषा दशांशं धुरस्करणहोमः। अथ पूजाविधिः॥

अं प्रभायै नमः। ई मायायै०। ऊं जयायै०। ऋं विशुद्धायै०। अः सर्वसिद्धिप्रदायै०। इति नवशक्तिभिरष्टदलेषु नवमिः कर्णिकायां च समभ्यर्च्य। पुनः अं वज्रनखदंष्ट्रायै०। ऐं सूक्ष्मायै० २९

ॐ नंदिन्यै०। क्लीं शुभगायै०। अं विजयायै०। अः सर्वसिद्धिप्रदायै०। वज्रनखदंष्ट्रायु-
धाय महासिंहाय फट् नमः इति कर्णिकायां सर्व तस्मिन् पीठे शूलिनीं समारोह्य समर्चयेत्।
अंगै प्रथमावृत्तिः। दुर्गायै०। वरदायै०। विंध्यवासिन्यै०। असुरमर्दिन्यै०। युद्धप्रियायै०।
देवसिद्धसुपूजितायै०। नंदिन्यै०। महायोगेश्वर्यै०। इति द्वितीयावृत्तिः। रथांगाभरणायै०
।बालायै०। कार्मुकावर्तनाय०। शूलाय०। पाशाय०। इति तृतीयावृत्तिः। लोकपालैश्चतुर्थी०
॥ अथ यक्षिणी मंत्रविधानमुच्यते॥ अस्य श्री यक्षणी मंत्रस्य। ब्रह्मा ऋषिः। अनुष्टुप् छंदः।
श्रीयक्षिणी देवता। 'हिमवत्युत्तरे पार्श्वे सुरथा नाम यक्षिणि। तस्या नूपुर शब्देन विशल्या भ-
वतु गर्भिणि स्वाहा॥ अनेन मंत्रेण तैलं दूर्वाग्रेण स्पृष्ट्वा जप्त्वा गर्भिणीं प्राशयेत्। प्रसववेदना
समये शीघ्रं प्रसोश्यवेत्.।
॥ अथ शीघ्रप्रसवार्थं मंत्रान्तरमप्यत्र कल्पान्तरोक्तं योग्यतावशात् क्रियते। ॐ क्षीं क्षौं
क्षयं इति मंत्रः॥ तैले मायाबीजं विलिख्य अनेन मंत्रेण। दूर्वाग्रेण स्पृष्ट्वा। एकविंशतिवारं या

२८ अष्टोत्तरसहस्रसंख्या अभिमंत्र्य तत्तैलं प्रसववेदना समये स्त्रियं प्राशयेत्। शीघ्रं प्रसोष्यते ॥

॥ अथ भुवनेशी चतुरक्षर विधानमुच्यते। अज ऋषिः। गायत्री छंदः। भुवनेशी देवता ॐ बीजम्। ह्रीं शक्तिः। ह्रां हृत्। ह्रीं शिरः। ह्रूं शिखा ह्रैं कवचं। ह्रौं नेत्रम्। ह्रः अस्त्रम्। ॐकारः सर्वत्र। अथ ध्यानम्। भास्वद्रत्नौघमौलौ स्फुरदमृतरुच्यो रंजय नूत्नाकरे रवां। सद्यस्तु स्तमकांतस्वर कमल जपा भासुराभिः प्रभाभिः॥ विभ्राणां कशा वकाशं ज्वलयद शिखिरं चाक्षपाशांकुशेष्टा भीतीनां भंगि तुंग स्तनमतु जगतां मातुरापूर्व पूर्वः॥ ॐ ह्रीं ह्रं सः॥ इति मंत्रः॥ ऐश्वर्यारोग्य प्रधानोऽयं मंत्रः। लक्षचतुष्कं जुहुयात्। त्रिमधुरसिक्ताभिः पलाशसमिद्भिर्वा सरोजैर्वा दशांशं जुहुयात्।

अथ अजपा विधानमुच्यते। ब्रह्मा ऋषिः। दैवी गायत्री छंदः। परमात्मा देवता। हं बीजं। सः शक्तिः। हंसों हृत्। हंसीं शिरः। हंसुं शिखा। इत्यादि षडंगानि। अथ ध्यानम्। — अरुण कनक वर्णं २८

पद्मसंस्थं च गौरि हरनियमितचिन्हं सौम्यतानं नयानम्। भवतु भवदभीष्ट प्राप्तये

णेशटंकं। भयवरदृचित्रं रूपमंध्याद्विरूशाम्॥१॥ तत्र सौम्यतानुनयात्तं सोमाग्निरूपं हंसः। इतिमंत्रः॥ प्रयोगविशेषे सोहमितिच योजयेत्॥ द्वादशलक्षंजपः॥ आज्यमि-श्रेण पायसेन द्वादशसहस्रं जुहुयात्॥

अथ प्रयोजनतिलकाख्य सौरमंत्रविधानमुच्यते। देवभाग ऋषिः। गायत्री छंदः। आदित्यो देवता। ह्रां बीजं। सः शक्तिः। ह्रां हृत्। ह्रीं शिरः। इत्याद्यंगानि। अथ ध्यानम्। अरुण सरोरुहसंस्थस्त्रिगरुडारुण। सरोज युगव कूरः। करकलिताभयवरदो द्युति विरोमितित भुवणस्त्विनोऽवतुनः॥ ह्रां ह्रीं सः॥ इतिमंत्रः॥ गुह्यादाचरणतलं कंठदागुह्य मागलं कांतान्॥ विन्यस्य मंत्रवर्णान्क्रमेण मंत्रिकरोतु त्र्यांगविधिः॥ द्वा-दशलक्षंजपेत्। आज्यसिक्तै रत्नैर्वा त्रिमधुरालमधुतैस्तिलैर्वा द्वादशसहस्रं जुहुयात्। इतिपुरश्चरणहोमः।

अथ सौरत्र्यक्षरमंत्रस्य विधानमुच्यते। देवभाग ऋषिः। गायत्री छंदः। आदित्यो देवता।

 ॐ बीजं। ह्रीं शक्तिः। ॐ सत्यतेजोज्वलज्वालामालिने हुंफट् स्वाहा हृदं। ॐ ब्रह्मतेजो
ज्वल० शिरः। ॐ विष्णुतेजोज्वल० शिखा। ॐ रुद्रतेजोज्वल० कवचं। ॐ वह्नितेजो
जोज्वल० नेत्रम्। ॐ सर्वतेजोज्वल० अस्त्रम्। अथ ध्यानम्। अरुणोकनपंकजे निष
ण्णां कमलभीतिधरो करैर्दधानः। स्वरुचा हितमंडलस्त्रिनेत्रो रविराकल्पशाता कुलोवतान्नः।
(ॐ) घृणिः सूर्य आदित्याय नमः॥ इति मन्त्रः। अष्टलक्षं जपेत्। त्रिमधुरसिक्ताभिः क्षीरभ
क्ष्य समिद्भिर्वा मधुक्लिन्नैर्वा अष्टसहस्रं जुहुयात्। पुरश्चरण होमः।
अथ चंद्रमनुविधानमुच्यते। अत्रिऋषिः। पंक्तिश्छंदः। सोमो देवता। सौं बीजं। माय
शक्तिः। सां हृदं। सीं शिरः। सूं शिखा। सैं कवचं। सौं नेत्रं। सः अस्त्रं। अथ ध्यानम्।
विमलकमल संस्थः सुप्रसन्नाननेन्दुर्वरद कुमुदहस्तश्चारुहारादिभूषः। स्फटिकरजत-
वर्णो वांछितप्राप्तये वो भवतु भवदभीष्टद्योतितांकः शशांकः॥ सौं सोमाय नमः॥ इति मंत्रः।
षट्लक्षं जपेत्। पंचमी दशमी पंचदशीषु तु विशेषतः। अयुतं प्रजपेन्मन्त्रः सायान्हेभ्यर्च्य
भक्तिभिः। पक्वान्नेन हुनेद्वैश्यः सघृतेन सहस्रकं। एकदिवसे ऽयुतं सायान्हे जप्त्वा सोमं

संपूज्य घृतसिक्तेन क्षीरान्नेन सहस्रं जुहुयात् ।

अथाऽग्निमंत्रविधानमुच्यते । भृगुऋषिः । गायत्री छंदः । अग्निर्देवता । ॐ बीजं । स्वाहा शक्तिः । सहस्रार्चिषे नमः हृत् । स्वस्तिपूर्णाय नमः शिरः । उत्तिष्ठ पुरुषाय नमः शिखा । धूमव्यापिने नमः कवचम् । सप्तजिह्वाय नमः नेत्रम् । धनुर्धराय नमः अस्त्रम् । स्वाहान्तेन व्याहृतित्रयेण द्विरावृत्त्यावा षडंगानि । अथ ध्यानम् । शक्ति स्वस्ति कपाशान् सांकुशवरदाभयान्दधग्निमुखः । मुकुटादि विविधभूषणो वत्ताच्छिरं यावकः प्रसन्नोऽवः । ॐ भूर्भुवः स्वः स्वाहा । इति मंत्रः । [illegible]प्रधानोऽयं मंत्रः । षट्लक्षं जपः । अथ पूजा । प्रथमं षट्कोणं विलिख्य तद्बहिर्वृत्तं विलिख्य तद्बहिः त्रिकोणं विलिखेत् । एतदग्निपीठं । अस्मिन् पीतायै नमः । श्वेतायै० । अरुणायै० । कृष्णायै० । धूम्रायै० । तीव्रायै० । स्फुलिंगिन्यै० । रुचिरायै० । ज्वालिन्यै० । इति नवशक्तिभिः समन्वये । तस्मिन्नग्निमूर्तिं समावाह्य समर्चयेत् । अंगैः प्रथमावृत्तिः । जातवेदसे सप्तजिह्वाय हव्यवाहनाय अश्वोदरजाय वैश्वानराय कौमारतेजसे विश्वमुखाय देवमुखाय

२९ इत्यष्टमूर्तिभिः द्वितीयावृत्तिः। लोकेशैस्तृतीया। एवं संपूज्य ईशानं सर्पिःसिक्तेन
पायसेन षष्टिद्विजा दुहानैः सिततरैः धान्यविशेषैः कृतेन दशांशं जुहुयात्॥ पुरश्चरण
होमः। अथ प्रयोगः। आज्यैरष्टोर्ध्वशतं प्रतिपदमारभ्य मंत्रवित्तद्दिनशः। चतुर्दशमा-
मासान्जुहुयात्। लक्ष्मीस्थिरमता भवेत्तस्य। प्रयोगान्तरम्। शुद्धाभिः शालिभिः दिन
मनुजुहुयाद्यथा क्रममात्रेण। शालिपूर्णगृहः स्यादो महिष्याद्यैश्च संकुलं तस्य शालिकुलवि
निकृ। अयमर्थः। शालिधान्यैर्नित्यशः अष्टोर्ध्वशतं जुहुयात्। अनेन वत्सरमात्रेण धा-
न्यगोमहिष्यादयोऽस्य जायन्ते॥ प्रयोगान्तरं॥ शुद्धान्नैर्घृतसिक्तैः प्रतिदिनमग्नौ समर्थ
ते जुहुयात्। अन्नसमृद्धिमेतीस्या दशानिकेतने ऽब्दमात्रेण॥ अयमर्थः। नित्यशः अ-
ष्टोर्ध्वशतं संवत्सरपर्यंतं जुहुयात्। उक्तफलं भवति। प्रयोगान्तरम्। जुहुयात्तिलैः शुद्धैः २९
षण्मासाज्जायते महालक्ष्मीः तिलमपि पूर्ववद्दिवाष्टोत्तरशतसंख्यं नित्यशः षण्मास

मित्यर्थः । प्रयोगान्तरम् । कुमुदैः कल्हारैरपि जातिकुसुमैश्च जायते सिद्धिः । पलाशैः पुन

रिधाद्वै अरासिजैर्बिल्वैश्च रक्तोत्पलैः दुग्धवीरुह संभवैः खदिरजैर्व्याघात वृक्षजैः ।

दूर्वाश्चैश्च शमितिकंकतजैः रष्टोर्ध्वयुक्तं शतं नित्यं जुहुयात् । प्रतिपदिपदं मंत्रि मह

सिध्द्ये कुमुदं आवळ कल्हारं शागळ निल्पु जातिशिता शिरखापकं । पळसे ध्यानं । पळशमं

मितु । रक्तोत्पलं शंनयतल्पु दुग्धो वीरुह संभवा अश्वत्थवटोदुंबर लक्षणं । समिधा खदिरं

करु गाळि समितु ॥ व्याघातवृक्षो ध्रुवः ॥ कुशमे समितु शमि वान्हि शतक्तवि कंकत भवार्थे

कंकत समिधः ॥ एतैरेकैरष्टोर्ध्वशतं नित्यं वा प्रतिपदं वा पञ्चमासं च जुहुयात् । एवं कृते

कुसुमाद्यैः श्रियमिलक्ष्मी सिद्धिः । पलाशाद्यैः सैरस्तु महालक्ष्मी सिद्धिः ॥

अथाऽग्निमंत्रांतरमुच्यते । भृगुऋषिः । गायत्री छंदः । अग्निर्देवता । ॐ बीजम् । स्वा

हाशक्तिः । ॐ भूर्भुवः स्वः हृत । अग्निजातवेदः शिरः । इहावह शिखा । सर्वकर्माणि कवचं ।

३० साधय नेत्रम्। स्वाहा अस्त्रम्। अग्ना शक्तिः। स्वस्तिकदर्भाक्षसूत्रकुशस्रुवस्रुगभयवरान्द-
धद्भिताकल्पेवाव सुखनास्कनकमालिकालसितः॥ ॐ भूर्भुवः स्वः अग्निर्जातवेद इ-
हावह सर्वकर्माणि साधय स्वाहा॥ इति मंत्रः॥ ऐश्वर्यप्रधानोऽयं मंत्रः॥ वत्सरादेश्चतुर्दश्यां
दिनावाविदीक्षितः। मंत्रं द्वादशसहस्रं जपेत्। सम्यगुपोषितः। एवं पुरश्चरणजपः। तत्र वत्स-
रादेश्चतुर्दश्यां चैत्रादिमेषसिंहधनुष्षप्रवर्तकानि मानुषवर्षे दैविकमासत्रयस्याऽपि कृष्ण-
चतुर्दश्यामित्यर्थः॥

अथोत्तिष्ठेत्याद्यग्निमंत्रमुच्यते। भृगुऋषिः। गायत्री छंदः। अग्निर्देवता। ॐ बीजम्
स्वाहा शक्तिः। उत्तिष्ठ पुरुष हृत्। हरिपिंगल शिरः॥ लोहिताक्ष शिखा॥ देहि मे कवचं।
ददापय नेत्रम्। स्वाहा अस्त्रम्। अथ ध्यानम्। हेमाम्भस्य सुरद्रुमोद्दरमुवो निर्यास- ३०
मग्नाकृतिं गर्भितं घनधान्यरनालियपाशं धौः स्वकैः संततम्। ज्वालापकूर्वीतस्वरोय-

विवरं भक्तार्तिसंभेदनं वंदे धर्मसुखार्थमोक्षफलदं दिव्याकृतिं पावकम् ॥१॥ इति ध्यानम् ॥ पुरु-
षहरिपिंगललोहिताक्ष देहि मे ददापय स्वाहा ॥ इति मंत्रः ॥ ऐश्वर्यप्रधानोऽयं मंत्रः । लक्षं
जपेत् । घृतसिक्तैः पायसैर्दशांशं पुरश्चरण होमः ॥
ॐ अस्य श्रीगुरुमंत्रस्य । परमशिव ऋषिः । विराट् छंदः । श्रीगुरुपरमात्मा देवता । हं बीजं ।
सं शक्तिः । क्रौं कीलकं । श्रीगुरुप्रसादसिध्यर्थे जपे विनियोगः । ॐ हंसं सत् अंगु० । ॐ
हंसं गुं तर्ज० । ॐ हंसं रं मध्य० । ॐ हंसं वें अना० । ॐ हंसं नं कनि० । ॐ हंसं मं करत० ।
एवं हृदयादि । व्यापकं करमूर्द्धेन कृत्वा । अथ ध्यानम् । ब्रह्मानंदं० । इति ध्यात्वा । पंचोपचारैः
संपूज्य जपं कृत्वा । ॐ हंसं सत् गुरवे नमः । इति मंत्रः । यथाशक्तिं जपित्वा । उत्तरन्या
सं । ध्यानं पूजा मुद्रा । पंचज्ञानयोनि सन्मुखिय विमालि निर्वाणं कृत्वा । नमस्कृत्य निवेदयेत्
अथ श्री महागणपति विधान मुच्यते । गणक ऋषिः । निचृत गायत्री छंदः । श्री म
हागणपतिर्देवता । गं बीजं । ह्रीं शक्तिः । ॐ श्रीं ह्रीं क्लीं ग्लौं गं गां हुम् । ॐ

श्रीं ह्रीं क्लीं ग्लौं गं गीं शिरः। इत्याद्यंगानि। अथ ध्यानम्। बीजापुरगदिक्षुकार्मुकरु-
जाचक्राब्जपाशोत्पलव्रीह्यग्रस्वविषाणरत्नकलशप्रोद्यत्कराम्भोरुहः॥ ध्येयो वल्ल-
भयासपद्मकरयाश्लिष्टोज्वलद्भूषणा विश्वोत्पत्तिविनाश संस्थितकरो विघ्नो वि-
शिष्टार्थदः॥ इति ध्यात्वा॥ (मंत्रः- ~~श्री~~ ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद
सर्वजनं मे वशमानय स्वाहा इति अष्टाविंशत्यक्षरः मंत्ररत्नमंजूषायाम्)
श्रीगणपतिः शुभम्॥ इति विजय नाम संवत्सरे शके १८७५ माघ वद्य पंचम्यां मंत्र
माला समाप्ता। यथा दृष्टा तथा लिखिता॥

॥ इति मंत्रमाला समाप्ता ॥



[OrderDescription]
,CREATED=15.06.20 13:09
,TRANSFERRED=2020/06/15 at 13:19:37
,PAGES=73
,TYPE=STD
,NAME=S0003143
,Book Name=M-990-MANTRAMALA MSS
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF

FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF

FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF

FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF

FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF

FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,